ISSN 0975-4067

# KIRAṆĀVALĪ

## Journal of Sanskrit Research Foundation

The New Trivandrum Sanskrit Series
Vol.XI.Book.I-IV

January - December 2019



किरणावली

SRFT
Sanskrit Research Foundation
Thiruvananthapuram

# इदानीन्तनकाले पुरुषार्थानां प्रासङ्गिकता

**Baneswar Jana**

बहुप्राचीनैतिह्यसमन्वितास्माकमियं भारतभूमिः। यत्र मनुष्याः बहुकालात् पूर्वमेव शिक्षाविषये संस्कृतिकविषये, अर्थनीतिविषये तथा राजनीतिविषये समृद्धाः तथा उन्नताः आसन्। इदानीन्तने काले आमेरिका-इउरोपादिमहादेशानामुन्नतसमृद्धदेशानां प्रभूतोन्नतिः अभवत्। परन्तु यदा एतेषां देशानामाविष्कारः नाभवत्,तस्मात् समयादपि पूर्वं भारतवर्षमधिकसमृद्धमासीत्, शिक्षितमासीत्॥ भारतस्य अस्याः समृद्धेः मूलकारणं तथा, तस्य आदर्शः खलु नैतिकताः। याः आगच्छन्ति आध्यात्मिकतायाः। आध्यात्मविषयकं चिन्तनं हि भारतवर्षस्य समृद्धेः मूलकारणमासीत्। तस्मात् भारतीयप्राचीनसाहित्यस्य प्रायशः सर्वांशेषु तस्य प्रतिफलनं दृष्यते। दर्शन-काव्य-धर्मशास्त्राद्यंशेषु धर्मादिपुरुषार्थचतुष्टयमेवा लोचितम्। यत् खलु पुरुषार्थचतुष्टयमेव भारतीय-सर्वविषयस्य मूलमिति नात्युक्तिः।पुरुषस्यार्थः(प्रयोजनम्)=पुरुषार्थः। अर्थात् यः पुरुषस्य प्रयोजनं साधयति स पुरुषार्थः। भारतीयमनीषायां धर्मार्थकाममोक्षा इत्येते चत्वारः पुरुषार्थाः। ये खलु सर्वमनुष्याणां जीवने अत्यन्तमहत्त्वपूर्णाः। यतः पुरुषार्थः हि मनुष्यान् तस्य सर्वश्रेष्ठं पदमर्थात् मोक्षपदं दातुं शक्नोति। अतः भारतीयमनीषानुसारं धर्मादेः पालनमेव मूख्यकर्तव्यम्।

**धर्मस्य प्रासङ्गिकता**

धर्मशब्दः धारकार्थकः। नियमस्य नामान्तरं खलु धर्मः। येन जगत् परिचालितं भवति। परन्तु समाजः अधुनाधर्मापन्नः अतः धरकाभावे समाजः अपि स्थानविच्युतः भवति। न केवलं सामाजिकक्षेत्रे अपि तु राजनैतिकक्षेत्रे तथा अर्थनैतिकक्षेत्रेऽपि अधर्मस्यैव प्राधान्यं, धर्मस्य पतनं सर्वदा परिलक्ष्यते। स्मृति-पुराणाद्यनुसारं कालः चतुर्विधः। अधुना कलियुगः चलति। कलियुगस्याधर्मिकतायाः उल्लेखः विविधशास्त्रेषु

Baneswar Jana is Asst. Prof of Garhbeta College, Garhbeta, Paschim Medinipur,West Bengal, and a Reserch Scholar of Ramakrishna Mission Vidyamandira, bapansanskrit@gmail.com